योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०७८

अष्टसप्ततितमः सर्गः ७८

श्रीवसिष्ठ उवाच ।
अथ सा राक्षसी रक्षःकुलकाननमञ्जरी ।
तमस्येवाभ्रलेखेव गम्भीरं विननाद ह ।। १
नादान्ते समुवाचेदं हुंकारापरुषं वचः ।
गर्जितानन्तरं जातकरकाशनिशब्दवत् ।। २
भो भो घोराटवीव्योमपदवीशशिभास्करौ ।
महामायातमःपीठशिलाकोटरकीटकौ ।। ३
कौ भवन्तौ महाबुद्धी दुर्बुद्धी वा समागतौ ।
मद्ग्रासपदमापन्नौ क्षणान्मरणकोचितौ ।। ४
राजोवाच ।
भो भो भूतक किं स्यास्त्वं क्व तिष्ठसि च देहकम् ।
दर्शयास्यास्तव गिरः को बिभेत्यलिनीध्वनेः ।। ५
सिंहवत्सर्ववेगेन पतन्त्यर्थे किलार्थिनः ।
त्यज संरम्भमारम्भं स्वसामर्थ्यं प्रदर्शय ।। ६
किं प्रार्थयसि मे ब्रूहि ददामि तव सुव्रत ।
किं वा संरम्भशब्दाभ्यां भीषयास्मान्बिभेषि किम् ।। ७
क्षिप्रमाकारशब्दाभ्यां मायया सन्मुखीभव ।
न किंचिद्दीर्घसूत्राणां सिद्ध्यत्यात्मक्षयादृते ।। ८
राज्ञेत्युक्ते रम्यमुक्तमिति संचिन्त्य सा तयोः ।
प्रकाशायाप्य धैर्याय ननाद च जहास च ।। ९
ततो ददृशतुस्तां तौ शब्दपूरितदिग्गणाम् ।
साट्टहासप्रभापिण्डपूरप्रकटिताकृतिम् ।। १०
कल्पाभ्राशनिकाषेण घृष्टामद्रितटीमिव ।

स्वनेत्रविद्युद्वलयबलाकोज्ज्वलिताम्बराम् ।। ११
तिमिरैकार्णवौर्वाग्निज्वालाविवलनामिव ।
गर्जद्धनघटाटोपपीवरासितकन्धराम् ।। १२
रणद्दशनसरम्भहाहाहतनिशाचराम् ।
रोदसीकज्जलस्तम्भां लीलयोल्लसितां पुनः ।। १३
ऊर्ध्वकेशीं शिरालाङ्गीं कपिलाक्षीं तमोमयीम् ।
यक्षरक्षःपिशाचानामप्यनर्थभयप्रदाम् ।। १४
देहरन्ध्रविशच्छ्वासवातभांकारभीषणाम् ।
मुसलोलूखलालातहलशूर्पकशेखराम् ।। १५
स्फुरन्तीमिव कल्पान्ते वैदूर्यशिखरस्थलीम् ।
हासघट्टितविश्वेशां कालरात्रिमिवोदिताम् ।। १६
शरद्व्योमाटवीं साभ्रां कृतदेहामिवागताम् ।
शरीरिणीं महाभ्राढ्यां यामिनीमिव मांसलाम् १७
शरीरसंनिवेशेन पङ्कपीठमिवोत्थिताम् ।
तनुं चन्द्रार्कयुद्धाय तमसेव समाश्रिताम् ।। १८
इन्द्रनीलमहाशुभ्रलम्बाभ्रयुगलोपमौ ।
उलूखलादिहारौघौ दधानामसितौ स्तनौ ।। १९
लग्नामङ्गारकाष्ठेन समानां च महातनुम् ।
द्रुमाभास्पन्दसशिरलसद्भुजलतातनुम् ।। २०
तामवेक्ष्य महावीरौ तथैवाक्षुभितौ स्थितौ ।
न तदस्ति विमोहाय यद्विविक्तस्य चेतसः ।। २१
मन्त्र्युवाच ।
महाराक्षसि संरम्भो महात्मा किमयं तव ।
लघवो ह्यथवा कार्ये लघावप्यतिसंभ्रमाः ।। २२
त्यज संरम्भमारम्भो नायं तव विराजते ।
विषये हि प्रवर्तन्ते धीमन्तः स्वार्थसाधकाः ।। २३
त्वादृशानां सहस्राणि मशकानामिवाबले ।
अस्माकं धीरतावात्याव्यूढानि तृणपर्णवत् ।। २४
संरम्भद्वारमुत्सृज्य समतास्वच्छया धिया ।
युक्ता च व्यवहारिण्या स्वार्थः प्राज्ञेन साध्यते ।। २५

स्वेनेव व्यवहारेण कार्यं सिद्ध्यतु वा न वा ।
महानियतिरित्येव भ्रमस्यावसरो हि कः ।। २६
कथयाभिमतं किं ते किमर्थयसि चार्थिनी ।
अर्थी स्वप्नेऽपि नास्माकमप्राप्तार्थः पुरो गतः ।। २७
इत्युक्ता सा तदा तेन चिन्तयामास राक्षसी ।
अहो नु विमलाचारं सत्त्वं पुरुषसिंहयोः ।। २८
न सामान्याविमौ मन्ये विचित्रेयं चमत्कृतिः ।
वचोवक्रेक्षणेनैव वदत्यन्तर्विनिश्चयम् ।। २९
वचोवक्रेक्षणद्वारैर्धीमतामाशया मिथः ।
एकीभवन्ति सरितां पयांसि वलनैरिव ।। ३०
आभ्यां प्रायः परिज्ञातो मम भावोऽनयोर्मया ।
न विनाश्यौ मया चेमौ स्वयमेवाविनाशिनौ ।। ३१
मन्ये भवेतामात्मज्ञौ नात्मज्ञानादृते मतिः ।
प्रमृष्टसदसद्भावाद्भवत्यस्तभया मृतौ ।। ३२
तदेतौ परिपृच्छामि किंचित्संदेहमुत्थितम् ।
प्राज्ञं प्राप्य न पृच्छन्ति ये केचित्ते नराधमाः ।। ३३
इति संचिन्त्य पृच्छायै तन्वानावसरं ततः ।
अकालकल्पाभ्ररवं हासं संयम्य साब्रवीत् ।। ३४
कौ भवन्तौ नरौ धीरौ कथ्यतामिति मेऽनघौ ।
जायते दर्शनादेव मैत्री विशदचेतसाम् ।। ३५
मन्त्र्युवाच ।
अयं राजा किरातानामस्याहं मन्त्रितां गतः ।
उद्यतौ रात्रिचर्येण त्वादृग्जनविनिग्रहे ।। ३६
राज्ञो रात्रिंदिवं धर्मो दुष्टभूतविनिग्रहः ।
स्वधर्मत्यागिनो ये तु ते विनाशानलेन्धनम् ।। ३७
राक्षस्युवाच ।
राजंस्त्वमसि दुर्मन्त्री दुर्मन्त्री न नृपो भवेत् ।
सद्रूपस्य भवेन्मन्त्री राजा सन्मन्त्रिणो भवेत् ।। ३८
राजा चादौ विवेकेन योजनीयः सुमन्त्रिणा ।
तेनार्यतामुपायाति यथा राजा तथा प्रजाः ।। ३९

समस्तगुणजालानामध्यात्मज्ञानमुत्तमम् ।

तद्विद्राजा भवेद्राजा तद्विन्मन्त्री च मन्त्रवित् ।। ४०

प्रभुत्वं समदृष्टित्वं तच्च स्याद्राजविद्यया ।

तामेव यो न जानाति नासौ मन्त्री न सोऽधिपः ४१

भवन्तौ तद्विदौ साधू यदि तच्छ्रेय आप्नुथः ।

नो चेदनर्थदौ स्वस्याः प्रकृतेरद्म्यहं युवाम् ।। ४२

एकोपायेन मत्पार्श्वाद्वालकावुत्तरिष्यथः ।

मत्प्रश्नपञ्जरं सारं चेद्विचारयथो धिया ।। ४३

प्रश्नानिमान्कथय पार्थिव वा च मन्त्रिंस्तत्रार्थिनी भृशमहं परिपूरयार्थम् ।

अङ्गीकृतार्थमददत्क इवास्ति लोके दोषेण संक्षयकरेण न युज्यते यः ।। ४४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे क० राक्षसीवर्णनं नामाष्टसप्ततितमः सर्गः ।। ७८ ।।